# shrIsudarshanakavacham 5

# શ્રીસુદર્શનકવચમ્ ૫

## Document Information

Text title : sudarshanakavacham 5

File name : sudarshanakavacham4.itx

Category : vishhnu, kavacha

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : April 12, 2018

Send corrections to : sanskrit@cheerful.com


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.


November 30, 2019

*sanskritdocuments.org*

# શ્રીસુદર્શનકવચમ્ ૫

અસ્ય શ્રીસુદર્શનકવચમહામન્ત્રસ્ય અહિર્બુધ્ન્ય ઋષિઃ ।
અનુષ્ટુપ્ છન્દઃ । સુદર્શનરૂપી પરમાત્મા દેવતા ।
સહસ્રારં ઇતિ બીજમ્ । સુદર્શનં ઇતિ શક્તિઃ ।
ચક્રરાડિતિ કીલકમ્ । મમ સર્વરક્ષાર્થે જપે વિનિયોગઃ ।
ૐ આચક્રાય સ્વાહા - અઙ્ગુષ્ઠાભ્યાં નમઃ । હૃદયાય નમઃ ।
ૐ વિચક્રાય સ્વાહા - તર્જનીભ્યાં નમઃ । શિરસે સ્વાહા ।
ૐ સુચક્રાય સ્વાહા - મધ્યમાભ્યાં નમઃ । શિખાયૈ વષટ્ ।
ૐ ધીચક્રાય સ્વાહા - અનામિકાભ્યાં નમઃ । કવચાય હુમ્ ।
ૐ જ્વાલાચક્રાય સ્વાહા - કનિષ્ઠિકાભ્યાં નમઃ । નેત્રત્રયાય વૌષટ્ ।
ૐ સુચક્રાય સ્વાહા - કરતલકરપૃષ્ઠાભ્યાં નમઃ । અસ્ત્રાય ફટ્ ।
ભૂર્ભુવઃસુવરોમિતિ દિગ્બધઃ ।
ધ્યાનમ્-
શઙ્ખં શાર્ઙ્ગં સુખેટં હલપરશુગદાપાશમન્તર્દધાને
સવ્યે વામેઽ થ ચક્રેઽપ્યસિમુસલલસદ્વજ્રહસ્તં ત્રિશૂલમ્ ।
જ્વાલાકેશં ચ પાશં જ્વલદનલશિખા વિદ્યુદૃઙ્ગપડલસ્થં
પ્રત્યાલીઢં ત્રિણેત્રં પુરગણમથનં ભાવયે મન્ત્રરાજમ્ ॥

મૂલમન્ત્રં- ૐ શ્રીં હ્રીં ક્લીં સહસ્રાર હું ફટ્ સ્વાહા ।
ૐ મસ્તકં મે સહસ્રારં પાતુ ફાલં સુદર્શનમ્ ।
ભ્રૂમધ્યે ચક્રરાટ્ પાતુ નેત્રેઽગ્ન્યર્કેન્દુલોચનઃ ॥ ૧॥

કર્ણૌ વેદસ્તવઃ પાતુ ઘ્રાણં પાતુ વિભીષણઃ ।
મહાદેવઃ કપોલં મે ચક્ષૂ રુદ્રો વરપ્રદઃ ॥ ૨॥

દન્તાન્ પાતુ જગદ્વન્દ્યો રસનાં મમ સર્વદઃ ।
સર્વવિદ્યાં નૃપઃ પાતુ ગિરં વાગીશ્વરોઽવતુ ॥ ૩॥

વીરસિંહો મુખં પાતુ ચિબુકં ભક્તવત્સલઃ ।

સર્વદા પૃષ્ઠદેશે મે દેવાનામભયપ્રદઃ ॥ ૪॥

નાભિં ષટ્કોણગઃ પાતુ ઘણ્ટારાવઃ કટિં તથા ।
ઊરૂ પાતુ મહાશૂરો જાનુની ભીમવિક્રમઃ ॥ ૫॥

જઘે પાતુ મહાવેગો ગુલ્ફાવદિતિરઞ્જનઃ ।
પાતુ પાદતલદ્વન્દ્વં વિશ્વભારો નિરન્તરમ્ ॥ ૬॥

સુદર્શનનૃસિંહો મે શરીરં પાતુ સર્વદા ।
પાતુ સર્વાઙ્ગકાન્તિં મે કલ્પાન્તાગ્નિસમપ્રભઃ ॥ ૭॥

મમ સર્વાઙ્ગરોમાણિ જ્વાલાકેશસ્તુ રક્ષતુ ।
અન્તર્બહિશ્ચ મે પાતુ વિશ્વાત્મા સર્વતોમુખઃ ॥ ૮॥

રક્ષાહીનં ચ યત્સ્થાનં પ્રચણ્ડસ્તત્ર રક્ષતુ ।
સર્વતો દિક્ષુ મે પાતુ જ્વાલાસાહસ્રસંસ્તુતમ્ ॥ ૯॥

ઇતિ સૌદર્શનં દિવ્યં કવચં સર્વકામદમ્ ।
સર્વપાપોપશમનં સર્વવ્યાધિનિવારણમ્ ॥ ૧૦॥

સર્વશત્રુક્ષયકરં સર્વમઙ્ગલદાયકમ્ ।
ત્રિસન્ધ્યં જપતાં નૃણાં સર્વદા સર્વકામદમ્ ॥ ૧૧॥

પ્રાતરુત્થાય યો ભક્ત્યા પઠેદેતત્સદા નરઃ ।
તસ્ય કાર્યેષુ સર્વેષુ વિઘ્નઃ કોઽપિ ન જાયતે ॥ ૧૨॥

યક્ષરાક્ષસવેતાલપિશાચાશ્ચ વિનાયકઃ ।
શાકિની ડાકિની માલા કાલિકા ચણ્ડિકાદયઃ ॥ ૧૩
ભૂતપ્રેતપિશાચાશ્ચ યેઽન્યે દુષ્ટગ્રહા અપિ ।
કવચસ્ય પ્રભાવેન દૃષ્ટિમાત્રેણ તેઽખિલાઃ ॥ ૧૪॥

પલાયન્તે યથા નાગાઃ પક્ષિરાજસ્ય દર્શનાત્ ।
અસ્યાયુતં પુરશ્ચર્યા દશાંશં તિલસર્પિષા ॥ ૧૫॥

હવનં તત્સમં ચૈવ તર્પણં ગન્ધવારિણા ।
પુષ્પાઞ્જલિં દશાંશેન મૃષ્ટાન્નૈઃ સુઘૃતપ્લુતૈઃ ॥ ૧૬॥

ચતુર્વિંશદ્દ્વિજા ભોજ્યાસ્તતઃ કાર્યાણિ સાધયેત્ ।
વિન્યસ્ય જવનો ધીરો યુદ્ધાર્થં યોઽધિગચ્છતિ ॥ ૧૭॥

ક્ષણાજ્જિત્વાઽખિલાન્ શત્રૂન્ વિજયી ભવતિ ધ્રુવમ્ ।

મન્ત્રિતામ્બુ ત્રિવારં વૈ પિબેત્સપ્તદિનાવધિ ॥ ૧૮॥

વ્યાધયઃ પ્રશમં યાન્તિ સકલાઃ કુક્ષિસમ્ભવાઃ ।
મુખરોગાક્ષિરોગાણાં નાશનં પરમં મતમ્ ॥ ૧૯॥

ભીતાનામભિષેકાચ્ચ મહાભયનિવારણમ્ ।
સપ્તાભિમન્ત્રિતાનેન તુલસીમૂલમૃત્તિકા ॥ ૨૦॥

લિમ્પેન્નશ્યન્તિ તદ્રોગાઃ સપ્ત કૃચ્છ્રાદયોઽખિલાઃ ।
લલાટે તિલકં નૃણાં મોહનં સર્વવશ્યકૃત્ ॥ ૨૧॥

પરેષાં મન્ત્રતન્ત્રાદિ નાશનં પરમં મતમ્ ।
અગ્નિસર્પાદિસર્વેષાં વિષાણાં હરણં પરમ્ ॥ ૨૨॥

સૌવર્ણે રાજતે વાપિ પત્રે ભૂર્જાદિકેઽપિ વા ।
લિખિત્વા પૂજયેદ્ભક્ત્યા સ શ્રીમાન્ભવતિ ધ્રુવમ્ ॥ ૨૩॥

બહુના કિમિહોક્તેન યદ્યદ્વાઞ્છતિ માનવઃ ।
સકલં પ્રાપ્નુયાદસ્ય કવચસ્ય પ્રભાવતઃ ॥ ૨૪॥

ઇતિ સુદર્શનકવચં ૪ સમાપ્તમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

---

*shrIsudarshanakavacham 5*

pdf was typeset on November 30, 2019

Please send corrections to *sanskrit@cheerful.com*